खरघातनः, पुं, ( खरं उग्रं रोगविशेषं घातयतीति। हन्+स्वार्थे णिच्+कर्त्तरि ल्युः। ) नागकेशरः। इति शब्दचन्द्रिका॥(खरं एतन्नाम्ना प्रसिद्धं राक्षसं घातयतीति। श्रीरामचन्द्रः। इति व्युत्पत्तिलब्धोऽर्थः॥)

खरच्छदः, पुं, (खरस्तीव्रश्छदः पत्रमस्य।) उलूकम्। उलुखड़ इति भाषा॥ इत्कटः। ओकड़ा इति भाषा। इति रत्नमाला॥ कुन्दरुत्रणम्। इति राजनिर्घण्टः॥

खरणसः, त्रि, ( खरा तीक्ष्णा नासिका अस्य। "खुरखराभ्यां वा नस्।" इति वार्त्तिं पक्षे "अच् नासिकायाः।" ५। ४। ११८। इत्यच् नसादेशश्च। ततः "पूर्व्वपदात् संज्ञायामगः।"८।४।३। इति णत्वम्। ) तीक्ष्णनासिकः। तत्पर्य्यायः। खरणाः २। इत्यमरः।२।६।४६॥

खरणाः, [स्] त्रि, (खरा तीक्ष्णा नासिका यस्य। "खुरखराभ्यां वा नस्।" वार्त्तिं इति नसादेशः। "पूर्व्वपदात् संज्ञायामगः।" ८।४।३। इति णत्वम्।) तीक्ष्णनासिकः। इत्यमरः। २।६।४६॥

खरत्वक्, स्त्री, (खरा तीक्ष्णा त्वक् यस्याः।) अलम्बुषा। लज्जालुप्रभेदः। इति भावप्रकाशः॥

खरदण्डं, क्ली, ( खरः कर्कशः दण्डो मृणालं यस्य कण्टकावृतत्वेति भावः।) पद्मम्। इति धरणी॥

खरदला, स्त्री, (खरं कर्कशं दलं पत्रमस्याः।) घेमाफला। इति शब्दचन्द्रिका॥ डुमुर इति भाषा॥

खरदूषणः, पुं, ( खरं उग्रं दूषणं मादकताजनकदोषो यत्र। ) धुस्तूरः। इति शब्दचन्द्रिका॥ खरेण राक्षसेन सह दूषणश्च॥ ( त्रि, बहुदोषः॥ )

खरध्वंसी [ न्, ] पुं, ( खरं स्वनामविश्रुतं राक्षसं ध्वंसयतीति। ध्वन्स्+णिच्+णिनिः। ) श्रीरामः। इति शब्दरत्नावली॥ (खरं कंसचरं दैत्यं ध्वंसयतीति। कृष्णः। इति व्युत्पत्तिलब्धोऽर्थः॥ )

खरनादिनी, स्त्री, ( खरं कर्कशं नदतीति। नद्+णिनिः। ततः स्त्रियां ङीप्। ) रेणुकानामगन्धद्रव्यम्। इति शब्दचन्द्रिका॥

खरपत्रः, पुं, ( खरं पत्रमस्य। ) क्षुद्रपत्रतुलसी। शाकाख्यवृक्षः। इति रत्नमाला॥ यावनालशरः। हरिदर्भः। मरुवकः। इति राजनिर्घण्टः॥

खरपत्रकः, पुं, ( खरपत्र+कप् संज्ञायां कन् वा। ) तिलकवृक्षः। इति शब्दचन्द्रिका॥

खरपत्री, स्त्री, ( खरपत्र+गौरादित्वात् ङीष्। ) गोजिह्वावृक्षः। काकोडुम्बरिका। इति राजनिर्घण्टः॥

खरपात्रं, क्ली, ( खरं कठोरं कठिनं वा पात्रम्। ) लौहपात्रम्। इति त्रिकाण्डशेषः॥

खरपादाढ्यः, पुं, ( खरैः दृढैः पादैर्मूलैराढ्यः। ) कपित्थवृक्षः। इति शब्दचन्द्रिका॥

खरपुष्पः, पुं, ( खरं पुष्पमस्य। ) मरुवकवृक्षः। इति रत्नमाला॥

खरपुष्पा, स्त्री, (खरं पुष्पं खराणि पुष्पाणि वा अस्याः। ) वर्व्वरा। इत्यमरः। २। ४। १३६॥ वावुइ तुलसी इति भाषा॥ (यथास्याः पर्य्यायाः।
"वर्व्वरी तुवरी तुङ्गी खरपुष्पाजगन्धिका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
व्यवहारोऽस्या यथा चरके विमानस्थानेऽष्टमेऽध्याये कटुकस्कन्धे। "एला-कुष्ठ-भल्लातकास्थि-हिङ्गु-किलिम-मूलक-सर्षप-लशुन-करञ्ज-शिग्रुक-मधुरशिग्रुक-खरपुष्पा" इत्यादिषु॥)

खरप्रियः, पुं, ( खलः धान्यकलायादिशस्यमर्द्दनस्थानं प्रियोऽस्य। लस्य रत्वम्। ) पारावतः। इति शब्दमाला॥

खरमञ्जरी, स्त्री, ( खरा मञ्जरी यस्याः। ) अपामार्गः। इत्यमरः। २। ४। ८९॥ (खर्ज्जिकाद्यतैलेऽस्या व्यवहारो यथा,—
"खर्ज्जिकासिन्धुदन्त्यग्निरूपिकामलनीलिका।
खरमञ्जरीबीजेषु तैलं गोमूत्रपाचितम्।
दुष्टव्रणप्रशमनं कफनाड़ीव्रणापहम्॥"
इति वैद्यकचक्रपाणिसंग्रहे नाड़ीव्रणाधिकारे॥)

खररोमा [ न्, ] पुं, ( खरं रोम अस्य। ) नागभेदः। इति जटाधरः॥

खरवल्लिका, स्त्री, ( खरा वल्लरी ततः स्वार्थे कन् टाप् च ईकारस्य ह्रस्वत्वं रस्य लत्वञ्च।) नागबला। इति रत्नमाला॥ गोरक्षचाउलिया इति भाषा॥

खरशब्दः, पुं, ( खर उग्रः शब्दोऽस्य। ) कुररपक्षी। इति राजनिर्घण्टः॥

खरशाकः, पुं, ( खरं शाकमस्य। ) भार्गी। इति भावप्रकाशः॥ वामनहाटी इति भाषा॥

खरस्कन्धः, पुं, ( खरः स्कन्धोऽस्य।) प्रियालवृक्षः। इति राजनिर्घण्टः॥

खरस्कन्धा, स्त्री, ( खरः स्कन्धोऽस्याः। ) खर्ज्जूरी। इति राजनिर्घण्टः॥

खरस्वरा, स्त्री, ( खरं रौद्रं स्वृणाति नाशयतीति। स्वृ+अच्। ) वनमल्लिका। इति रत्नमाला॥

खरा, स्त्री, (खं आकाशं लाति गृह्णातीति। ला+कः। लस्य रत्वम्।) देवताड़वृक्षः। इत्यमरः। २। ४। ९६॥

खरांशुः, पुं, ( खरा अंशवो रश्मयो यस्य। ) सूर्य्यः। इति त्रिकाण्डशेषः॥

खरागरी, स्त्री, (खरं आगिरतीति। आ+गॄ+अच्। ततो गौरादित्वात् ङीष्। ) देवताड़वृक्षः। इत्यमरटीकायां रायमुकुटः॥ (पर्य्यायोऽस्या यथा, वैद्यकरत्नमालायाम्।
"वेणी जीमूतकश्चाखुविषाजिलोमशश्छदः।
खरागरी कदम्बश्च खुड्डाको देवताड़कः॥")

खराब्दाङ्कुरकं, क्ली, (खराब्दात् तीव्रगर्ज्जनमेघात् अङ्कुरयतीति। अङ्कुरि+ण्वुल्। अस्य हि नूतनजलदध्वनेरङ्कुरोत्पत्तेस्तथात्वम्। ) वैदूर्य्यमणिः। इति राजनिर्घण्टः॥

खराश्वा, स्त्री, ( खरैरश्यते भुज्यतेऽसौ। अश् भोजने+"उल्वादयश्च।" उणां। ४। ९५। इति वः।) मयूरशिखा। रुद्रजटा इति ख्याता। चित्रयमानिका इति केचित्। इत्यमरभरतौ॥ (यथास्या गुणाः।
"खराश्वा कफवातघ्नी वस्तिरोगरुजापहा॥"
इति चरके सूत्रस्थाने सप्तविंशेऽध्याये॥)

खराह्वा, स्त्री, (खरं तीव्रगन्धं आह्वयतीति। ह्वे+कः। स्त्रियां टाप्। ) अजमोदा। इति राजनिर्घण्टः॥ ( पर्य्यायोऽस्या यथा,—
"अजगन्धाजमोदाख्या खराह्वा कारवी च सा॥"
इति वैद्यकरत्नमालायाम्॥)

खरिका, स्त्री, (खात् शून्यात् गन्धविशेषं रातीति। रा+कः ततः संज्ञायां कन् टाप् अत इत्वञ्च।) कस्तूरीभेदः। सा तु चूर्णाकृतिः। इति राजनिर्घण्टः॥

खरुः, पुं, ( खन्+"खरुशङ्कुपीयूनीलङ्गुलिगु।" उणां १। ३७। इति कुः रश्चान्तादेशः। ) शिवः। हयः। दर्पः। दन्तः। इति मेदिनी। रे। २१॥ कामदेवः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ शुक्लवर्णः। इति हेमचन्द्रः॥

खरुः, त्रि, ( खन्+"खरुशङ्कुपीयुनीलङ्गुलिगु।" उणां १।३७। इति कुः रश्चान्तादेशः। ) श्वेतः। इति मेदिनी। रे।२२॥ निषिद्धेकरुचिः। इति हेमचन्द्रः॥ निर्बोधः। क्रूरः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ तीक्ष्णः। इति संक्षिप्तसारे उणादिवृत्तिः॥

खर्ज्ज, व्यथाम्टजोः। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) खर्ज्जति। मृट् मार्ज्जनम्। इति दुर्गादासः॥

खर्ज्जिका, स्त्री, (खर्ज्ज+ण्वुल्+स्त्रियां टाप् अत इत्वञ्च। ) अवदंशः। इति शब्दचन्द्रिका॥

खर्ज्जुः, पुं, ( खर्ज्ज+उन्। ) खर्ज्जूरी। कण्डुः। कीटः। इति हेमचन्द्रः॥

खर्ज्जुरं, क्ली, ( खर्ज्ज+उरच्। ) रौप्यम्। इत्यमरटीकायां रमानाथः॥

खर्ज्जूः, स्त्री, ( खर्ज्ज व्यथने+"कृषिचमितनीति।" उणां १। ८२। इति ऊः। ) कण्डुः। कीटः। इत्युणादिकोषः॥

खर्ज्जूघ्नः, पुं, ( खर्ज्जूं कण्डूयनं हन्तीति। हन्+टक्। ) चक्रमर्द्दः। धत्तूरः। अर्कवृक्षः। इति राजनिर्घण्टः॥

खर्ज्जूरं, क्ली, ( खर्ज्जूरस्य फलम्। फले विहितस्याणो लुप्। ) खर्ज्जूरफलम्। अस्य गुणाः। मधुरत्वम्। शीतलत्वम्। गुरुत्वम्। क्षयाभिघातदाहवातपित्तरोगे हितत्वम्। बृंहणत्वम्। शुक्रवृद्धिकारित्वञ्च। इति राजवल्लभः॥
("अपक्वखर्ज्जूरफलं त्रिदोषशमनं मतम्।
पक्वमेव हितं स्निग्धं त्रिदोषशमनं परम्॥"
इति प्रथमे स्थाने दशमेऽध्याये हारीतेनोक्तम्॥
यथा च चरके सूत्रस्थाने सप्तविंशेऽध्याये।
"मधुरं बृंहणं वृष्यं खर्ज्जूरं गुरु शीतलम्।